## || नारायण स्तोत्रम् ||

नारायण नारायण जय गोविन्द हरे ॥

नारायण नारायण जय गोपाल हरे ॥

करुणापारावार वरुणालयगम्भीर नारायण ॥ 1 ॥

घननीरदसङ्काश कृतकलिकल्मषनाशन नारायण ॥ 2 ॥

यमुनातीरविहार धृतकौस्तुभमणिहार नारायण ॥ 3 ॥

पीताम्बरपरिधान सुरकल्याणनिधान नारायण ॥ 4 ॥

मञ्जुलगुञ्जाभूष मायामानुषवेष नारायण ॥ 5 ॥

राधाधरमधुरसिक रजनीकरकुलतिलक नारायण ॥ 6 ॥

मुरलीगानविनोद वेदस्तुतभूपाद नारायण ॥ 7 ॥

बर्हिनिबर्हापीड नटनाटकफणिक्रीड नारायण ॥ 8 ॥

वारिजभूषाभरण राजीवरुक्मिणीरमण नारायण ॥ 9 ॥

जलरुहदलनिभनेत्र जगदारम्भकसूत्र नारायण ॥ 10 ॥

पातकरजनीसंहार करुणालय मामुद्धर नारायण ॥ 11 ॥

अघ बकहयकंसारे केशव कृष्ण मुरारे नारायण ॥ 12 ॥

हाटकनिभपीताम्बर अभयं कुरु मे मावर नारायण ॥ 13 ॥

दशरथराजकुमार दानवमदसंहार नारायण ॥ 14 ॥

गोवर्धनगिरि रमण गोपीमानसहरण नारायण ॥ 15 ॥

सरयुतीरविहार सज्जनऋषिमन्दार नारायण ॥ 16 ॥

विश्वामित्रमखत्र विविधवरानुचरित्र नारायण ॥ 17 ॥

ध्वजवज्राङ्कुशपाद धरणीसुतसहमोद नारायण ॥ 18 ॥

जनकसुताप्रतिपाल जय जय संस्मृतिलील नारायण ॥ 19 ॥

दशरथवाग्धृतिभार दण्डक वनसञ्चार नारायण ॥ 20 ॥

मुष्टिकचाणूरसंहार मुनिमानसविहार नारायण ॥ 21 ॥

वालिविनिग्रहशौर्य वरसुग्रीवहितार्य नारायण ॥ 22 ॥

मां मुरलीकर धीवर पालय पालय श्रीधर नारायण ॥ 23 ॥
जलनिधि बन्धन धीर रावणकण्ठविदार नारायण ॥ 24 ॥

ताटकमर्दन राम नटगुणविविध सुराम नारायण ॥ 25 ॥
गौतमपत्नीपूजन करुणाघनावलोकन नारायण ॥ 26 ॥

सम्भ्रमसीताहार साकेतपुरविहार नारायण ॥ 27 ॥
अचलोद्धृतचञ्चत्कर भक्तानुग्रहतत्पर नारायण ॥ 28 ॥

नैगमगानविनोद रक्षित सुप्रह्लाद नारायण ॥ 29 ॥
भारत यतवरशङ्कर नामामृतमखिलान्तर नारायण ॥ 30 ॥

|| इति श्री नारायण स्तोत्र ||